# Shri Kalyana Stavaraja

# શ્રી કલ્યાણસ્તવરાજઃ

## Document Information

Text title : Shri Kalyana Stavaraja 08 19

File name : kalyANastavarAjaH.itx

Category : devii, devI, stavarAja

Location : doc_devii

Author : Manmatha

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-19

Latest update : August 15, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 7, 2024

*sanskritdocuments.org*

# શ્રી કલ્યાણસ્તવરાજઃ

કલ્યાણવૃષ્ટિભિરિવામૃતપૂરિતાભિ-
    ર્લક્ષ્મીસ્વયંવરણમઙ્ગલદીપિકાભિઃ ।
સેવાભિરમ્બ તવ પાદસરોજમૂલે
    નાકારિ કિં મનસિ ભક્તિમતાં જનાનામ્ ॥ ૧॥

એતાવદેવ જનનિ સ્પૃહણીયમાસ્તે
    ત્વદ્વન્દનેન સલિલસ્થગિતે ચ નેત્રે ।
સાન્નિધ્યમુદ્યદરુણાયતલોચનસ્ય
    ત્વદ્વિગ્રહસ્ય સુધયા પરયાપ્લુતસ્ય ॥ ૨॥

ઈશિત્વભાવકલુષાઃ કતિ નામ સન્તિ ।
    બ્રહ્માદયઃ પ્રતિયુગં પ્રલયાભિભૂતાઃ ।
એકઃ સ એવ જનનિ સ્થિરસિદ્ધિરાસ્તે
    યઃ પાદયોસ્તવ સકૃત્પ્રણતિં કરોતિ ॥ ૩॥

લબ્ધ્વા સકૃત્ ત્રિપુરસુન્દરિ તાવકીનં
    કારુણ્યકન્દલિતકાન્તિભરં કટાક્ષમ્ ।
કન્દર્પભાવસુભગાસ્ત્વયિ ભક્તિભાજઃ
    ત્વં (સં) મોહયન્તિ તરુણી વનત્રયસ્ય ॥ ૪॥

હ્રીઙ્કારમેવ તવ નામ ગૃણન્તિ વેદા
    માતસ્ત્રિકોણનિલયે ત્રિપુરે ત્રિણેત્રે ।
યત્સુસ્પૃશો યમભટાભિભવં વિહાય
    દીવ્યન્તિ નન્દનવને સહ લોકપાલૈઃ ॥ ૫॥

હન્તુઃ પુરામધિગલં પરિઘૂર્ણમાનઃ
    ક્રૂરઃ કથં નુ ભવિતા ગરલસ્ય વેગઃ ।
નાશ્વાસનાય યદિ માતરિદં ત્વદર્ધં
    દેહસ્ય શશ્વદમૃતાપ્લવશીતલસ્ય ॥ ૬॥

સર્વજ્ઞતાં સદસિ વાક્પટુતાં પ્રસૂતે
    દેવિ ત્વદઙ્ઘ્રિસરસીરુહયોઃ પ્રણામઃ ।
કિઞ્ચ સ્ફુરન્મકુટમુજ્જ્વલમાતપત્રં
    દ્વે ચામરે ચ મહતીં વસુધાં દદાતિ ॥ ૭॥

કલ્પદ્રુમૈરભિમતપ્રતિપાદનેષુ
    કારુણ્યવારિધિભિરમ્બ ભવત્કટાક્ષૈઃ ।
આલોકય ત્રિપુરસુન્દરિ મામનાથં
    ત્વય્યેવ ભક્તિભરિતં ત્વયિ દત્તદૃષ્ટિમ્ ॥ ૮॥

હન્તેતરેષ્વપિ મનાંસિ નિધાય ચાન્યે
    ભક્તિં વહન્તિ કિલ પામરદૈવતેષુ ।
ત્વામેવ દેવિ મનસાહમનુસ્મરામિ
    ત્વામેવ નૌમિ શરણં જનનિ ત્વમેવ ॥ ૯॥

લક્ષેષુ સત્સ્વપિ તવાક્ષિવિલોકનાનાં
    આલોકય ત્રિપુરસુન્દરિ માં કથઞ્ચિત્ ।
નૂનં મયા તુ સદૃશઃ કરુણૈકપાત્રં
    જાતો જનિષ્યતિ જનો ન તુ જાયમાનઃ ॥ ૧૦॥

હ્રીં હ્રીમિતિપ્રતિપદં જપતાં તવાખ્યાં
    કિં નામ દુર્લભમિહ ત્રિપુરાધિવાસે ।
માલાકિરીટમદવારણમાનિનીય
    તં સેવતે વસુમતી સ્વયમેવ લક્ષ્મીઃ ॥ ૧૧॥

સમ્પત્કરાણિ સકલેન્દ્રિયનન્દનાનિ
    સામ્રાજ્યદાનકુશલાનિ સરોરુહાક્ષિ ।
વલ્લોચનાનિ દુરિતૌઘનિવારણાનિ
    મામેવ માતરનિશં કલયન્તુ માન્યમ્ ॥ ૧૨॥

કલ્પોપસંહરણકલ્પિતતાણ્ડવસ્ય
    દેવસ્ય ખણ્ડપરશોઃ પરભૈરવસ્ય ।
પાશાઙ્કુશૈક્ષવશરાસનપુષ્પબાણા
    સા સાક્ષિણી વિજયતે તવ મૂર્તિ રેકા ॥ ૧૩॥

લગ્નં સદા ભવતુ માતરિદં ત્વદીય

તેજઃ પરં બહુલકુઙ્કુમપઙ્કશોણમ્ ।
ભાસ્વત્કિરીટમમૃતાંશુકલાવતંસં
મધ્યેત્રિકોણનિલયં પરમામૃતાર્દ્રમ્ ॥ ૧૪॥

હ્રીઙ્કારમેવ તવ નામ તદેકરૂપં
કિં નામ સુન્દરિ સરોજનિવાસશીલે ।
ત્વત્તેજસા પરિણતં વિદધાતિ ભૂત-
સર્ગં તનોતિ સરસીરુહસમ્ભવોઽયમ્ ॥ ૧૫॥

હ્રીઙ્કારત્રયસમ્પુટેન મહતા મન્ત્રેણ સન્દીપિતં
સ્તોત્રં યઃ પ્રતિવાસરં તવ પુરો હ્યેતજ્જપેન્માનવઃ ।
તસ્ય ક્ષોણિભુજો ભવન્તિ વશગા લક્ષ્મીઃ સ્થિરસ્થાયિની
વાણી નિર્મલસૂક્તિભારભરિતા જાગર્તિ દીર્ઘં વયઃ ॥ ૧૬॥

કુવલયદલનીલં બર્બરસ્નિગ્ધકેશં
પૃથુતરકુચભારં ક્રાન્તકાન્તાવલગ્નમ્ ।
કિમિહ બહુભિરુક્તૈઃ ત્વત્સ્વરૂપં પરં તત્
સકલભુવનમાતઃ સન્તતં સન્નિધત્તામ્ ॥ ૧૭॥

માણિક્યમાગલિકસૂત્રિતપાલિકેન
મન્દસ્મિતેન મ(વ)દનારુણપઙ્કજેન ।
કાલાન્તદીર્ઘમણિમઙ્ગલસૂત્રકણ્ઠી-
મમ્બાં વિશાલનયનાં મનસા સ્મરામિ ॥ ૧૮॥

ઇતિ મન્મથેન વિરચિતઃ શ્રીકલ્યાણસ્તવરાજઃ સમ્પૂર્ણઃ ।

Proofread by Rajesh Thyagarajan

*Shri Kalyana Stavaraja*

pdf was typeset on March 7, 2024

Please send corrections to *sanskrit@cheerful.com*